**2024**

**SANSKRIT**

**M.A. Third Semester End Examination - 2024**

**PAPER - SAN-305(A)**

*Full Marks : 40* *Time : 2 hours*

*The figures in the right-hand margin indicate marks.*
*Candidates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

(सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्)

1. यथेच्छं प्रश्नचतुष्टयम् उत्तरत। 2×4=8

   (i) कृत्याश्रयत्वं कर्तृत्वमिति कर्तृस्वरूपं केषाम् अभिप्रेतम्? तत्स्वीकारे को दोषः?

   (ii) रामः रावणं हन्ति इति व्याकरणस्य वैयाकरणमते शाब्दबोधो लेख्यः?

   (iii) शब्दकौस्तुभः कस्माद् उद्धृतः? 'तत्र निर्णीत' इत्युक्तिः किं बोधयति?

   (iv) नैयायिकमते तिङर्थः कः?

(v) वर्णाः केन कति प्रोक्ताः ? के च ते ?

(vi) पाणिनीयशिक्षानुसारं कवर्गस्य तथा ओ-औवर्णयोः उच्चारणस्थानं किम् ?

2. **यथानिर्देशम् उत्तरत–**

क) **यथाभिलाषं त्रीन् समाधत्त।** **4×3=12**

(i) 'श्रीलक्ष्मीरमणं नौमी'त्यादिमङ्गलश्लोकं व्याख्यात।

(ii) भूषणसारदिशा धातुलक्षणं निरूपयत।

(iii) 'फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः' इत्यादिकारिकां व्याख्यात ?

(iv) भूषणसारदिशा सकर्मकत्वाकर्मकत्वव्यवस्थां वर्णयत।

(v) कारिकां व्याख्यात –

भेद्यभेदकसम्वन्धोपाधिभेदनिवन्धनम्।
साधुत्वं तदभावेऽपि वोधो नेह निवार्य्यते॥

ख) **अनुप्रियम् एकम् व्याख्यात।** **4×1=4**

(i) आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥

(ii) मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।





स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

3. **यथानिर्देशं समाधेयम्–** **8×2=16**

क) 'साधुत्वमष्टकस्यास्य क्रिययैवावधार्य्यताम्' इत्यत्र कथं साधुत्वम् अष्टकस्य क्रिययेति वर्णयत।

**अथवा**

व्याख्यायताम्–

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥

ख) कति वेदाङ्गानि ? तानि वेदानां किमङ्गस्वरूपाणि ? वेदाङ्गानां नामानि उल्लिख्य वेदाङ्गता प्रतिपादनीया।

**अथवा**

केऽधमपाठकाः ? पाठप्रकारविशेषाणां निषेधाः के सन्ति ? के पाठकगुणाः ? मात्रोच्चारणप्रकार उल्लेख्यः।